जम्भारिमुख्यैरभिवन्दिताभ्यां नमो नमः शङ्करपार्वतीभ्याम् ॥ १ ॥

End:

नमः शिवाभ्यामशिवापहाभ्यामशेषकल्याणविशेषदाभ्याम् ।
असम्भवाभ्यां श्रुतिसम्भवाभ्यां नमो नमः शङ्करपार्वतीभ्याम् ॥ ९ ॥
नमस्कारात्मकं स्तोत्रं व्यासेन परिकीर्तितम् ।
यः पठेच्छ्रावयेद्भक्त्या सर्वान् कामानवाप्नुयात् ॥ १० ॥

Colophon:

इति श्रीवेदव्यासकृतं नमस्कारदशकस्तोत्रं सम्पूर्णम् ॥

No. 11029. नमस्कारस्तोत्रम्.
NAMASKĀRASTOTRAM.

Page, 1. Lines, 6 on a page.

Begins on fol. 395 of the MS. described under No. 5422, wherein it is called Mahādēvāṣṭaka in the list of other works.

Complete.

Eulogistic stanzas offering worship and homage to Śiva.

Beginning:

वन्दे शम्भुमुमापतिं सुरगुरुं वन्दे जगत्कारणं
वन्दे पन्नगभूषणं मृगधरं वन्दे पशूनां पतिम् ।
वन्दे सूर्यशशाङ्कवह्निनयनं वन्दे मुकुन्दप्रियं
वन्दे भक्तजनाश्रयं च वरदं वन्दे शिवं शङ्करम् ॥ १ ॥

End:

वन्दे भर्गमनर्घभूषणधरं वन्दे महत्कारणं
वन्दे कन्धिनिषङ्गमर्जुनवनुं वन्दे श्रुतिव्यापकम् ।
वन्दे विश्वनयं पुरन्दरस्तुतं वन्दे पारंतारकं
वन्दे भक्तजनाश्रयं च वरदं वन्दे शिवं शङ्करम् ॥ ५ ॥
वन्दे सर्पमनात्कृतिं (शर्वगनाकृतिं) मुनिस्तुतं वन्दे (ग)गङ्गाधरं
वन्दे पुष्करमन्धकासुररिपुं वन्दे वृषाङ्कध्वजम् ।
वन्दे वासुकिभूषणं परशिवं वन्दे गिरि(शं)हरं
वन्दे . . . . शिवं शङ्करम् ॥
शङ्करस्य चरिताकथामृतं चन्द्रशेखरगुणानुकीर्तनम् ।
नीलकण्ठ तव पादसेवनं संभवन्तु मम जन्मजन्मनि ॥
कोटयो ब्रह्महत्यानामगम्यागमकोटयः ।
सद्यः प्रलयमायान्ति [श्री]महादेवेति कीर्तन(नात्) ॥

No. 11030. नमस्कारस्तोत्रम्.
NAMASKĀRASTŌTRAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 18a of the MS. described under No. 366.

Incomplete.

Same work as the above

No. 11031. नमस्कारस्तोत्रम्.
NAMASKĀRASTŌTRAM.

Pages, 2. Lines, 6 on a page.

Begins on fol. 47b of the MS. described under No. 5422, wherein it has been omitted to be included in the list of other works.

Complete.

Same work as the above.

No. 11032. नमस्कारस्तोत्रम्.
NAMASKĀRASTŌTRAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 1a of the MS. described under No. 781, wherein it is called Śivāṣṭaka in the list of other works.

Complete.

Same work as the above.

No. 11033. नमस्कारस्तोत्रम्.
NAMASKĀRASTŌTRAM.

Pages, 4. Lines, 5 on a page.

Begins on fol. 61b of the MS. described under No. 2550 wherein it is called Śaṅkarāṣṭaka in the list of other works.

Complete.

Same work as the above, but with a different end as given below :—

मेरुकाञ्चनदत्तानां गवां कोटिशतैरपि ।
पञ्चकोटितुरङ्गानां तत्फलं शिवदर्शनम् ॥

No. 11034. नमस्कारस्तोत्रम्.
NAMASKĀRASTŌTRAM.

Pages, 5. Lines, 5 on a page.

Begins on fol. 69b of the MS. described under No. 5037, wherein it is called Śivastōtra in the list of other works.

Complete.

Same work as the above.

Copying was completed on Wednesday, the 2nd of Mārgaśira Bahula of Bhava year, by Nandūru Śarabhayya for Timmarāja Subbarāya from the manuscript belonging to Dēvakrāna Sūrayya.

No. 11035. नमस्कारस्तोत्रम्.
NAMASKĀRASTŌTRAM.

Pages, 4. Lines, 4 on a page.

Begins on fol. 79a of the MS. described under No. 2418, wherein it is called Śaṅkarāṣṭaka in the list of other works.

Complete.

Same work as the above, but without the last stanza.

No. 11036. नमस्काराष्टकम्.
NAMASKĀRĀṢṬAKAM.

Page, 1. Lines, 8 on a page.

Begins on fol. 173b of the MS. described under No. 119.

Complete.

Eight stanzas in salutation and praise of Śiva, which are said to have been composed by Nārāyaṇa.

Beginning:

नारायण उवाच—

नमस्ते नीलकण्ठाय नमस्ते निर्मलाय च ।
नमस्ते पार्वतीशाय नमस्ते मारवैरिणे ॥
नमस्ते कालरूपाय नमस्ते कालमारिणे ।
नमस्ते नागभूषाय नमस्ते सोममौलये ॥

End:

नमस्काराष्टकमिदं नारायणविनिर्मितम् ।
सर्वपापप्रशमनं सर्वव्याधिविनाशनम् ॥

* * *

यः पठेद्यतः श्रेष्ठो भुक्तिमुक्तिमवाप्नुयात् ॥

Colophon:

नमस्काराष्टकं संपूर्णम् ॥

No. 11037. नमस्काराष्टकम्.
NAMASKĀRĀṢṬAKAM.

Pages, 3. Lines, 4 on a page.

Begins on fol. 63a of the MS. described under No. 2418.

Complete; wants beginning.

Similar to the above.

Beginning:

नमस्ते गुणरूपाय नमस्ते निर्गुणाय च ।
नमस्ते पञ्चवक्त्राय नमस्ते त्र्यम्बकाय ते ॥
नमस्ते जाह्नवीभर्त्रे नमस्ते श्रीधराय च ।
नमस्ते ब्रह्मरूपाय नमस्ते विष्णुवल्लभ ॥

नमस्काराष्टकं पुण्यं नारायणविनिर्मितम् ।
सर्वपापप्रशमनं सर्वव्याधिविनाशनम् ।

End:

भवकोटिसहस्रेषु यस्य पातककोटयः ।
सद्यः प्रलयमायान्ति महादेवेति कीर्तनात् ॥

No. 11038. नामाष्टकम्.
NĀMĀṢṬAKAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 24a of the MS. described under No. 6400 wherein it is wrongly stated as Kṛṣṇāṣṭaka in the list of other works.

Complete.

Eight stanzas explaining the eight names of Śiva, viz., उग्र, महादेव सदाशिव, स्थाणु, बहुरूप, धूर्जटि, विश्वरूप, सर्वचक्षुस् ।

Beginning:

महाव्रतापसंपन्नो महेशो नित्यमेव यः ।
उग्र इत्युच्यते सोऽयमुग्राय ते नमो नमः ॥

End:

> ना(ना)माष्टकं नित्यन(पर्म) पठेयः शृणुयादपि ।
> शम्भोस्तस्याखिला सिद्धिः करस्था नात्र संशयः ॥

No. 11039. नामाष्टकम्.
NĀMĀṢṬAKAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 41*b* of the MS. described under No. 6422, wherein it is called Śivastōtra in the list of other works.

Complete.

Same work as the above.

No. 11040. नीलकण्ठस्तोत्रम्.
NĪLAKAṆṬHASTŌTRAM.

Pages, 6. Lines, 9 on a page.

Begins on fol. 150*a* of the MS. described under No. 119.

Complete; as found in the Vāyupurāṇa.

This work is in praise of Nīlakaṇṭha *i.e.*, Śiva, and is said to have been uttered by Brahman. Śiva is called Nīlakaṇṭha because the poison which he swallowed at the time of the churning of the ocean is said to have remained in his gullet without going down and thereby imparted a blue colour to his neck.

Beginning:

अस्य श्रीनीलकण्ठस्तोत्रमन्त्रस्य नानाच्छन्दांसि, जैमिनिः ऋषिः, श्रीनीलकण्ठसदाशिवो देवता ।

* * * *

> अथात्मानं शिवात्मानमेकास्यं चिन्तयेद् द्विजः ।
> त्रिणेत्रं च चतुर्बाहुं सर्वालंकारभूषितम् ॥
> नीलकण्ठं शशाङ्काङ्कं व्याघ्रचर्मोत्तरीयकम् ।

End:

> श्रुतं मया पापहरं महाफलं निवेद्य दिव्ये प्रययौ प्रभञ्जनः ।
> अधीत्य तत्वं सकलं सलक्षणं जगाम सादित्यफलं(पदं) द्विजोत्तमः ॥

Colophon:

इति श्रीमद्वायुपुराणे उमामहेश्वरसंवादे ब्रह्मप्रोक्तं श्रीनीलकण्ठस्तोत्रं संपूर्णम् ॥

No. 11041. नीलकण्ठस्तोत्रम्.
NĪLAKAṆṬHASTŌTRAM.

Pages, 4. Lines, 10 on a page.

Begins on fol. 60a of the MS. described under **No. 1493**, wherein it has been omitted to be included in the list of other works.

Complete.

Same work as the above.

No. 11042. नीलकण्ठस्तोत्रम्—सव्याख्यानम्.
NĪLAKAṆṬHASTŌTRAM WITH COMMENTARY.

Pages, 20. Lines, 8 on a page.

Begins on fol. 87a of the MS. described under No. 1091[illegible].

Complete.

A commentary on the Nīlakaṇṭhastōtra found in the Vāyupurāṇa: by Yarō Dāsayamantrin.

Beginning:

नीलकण्ठस्तुतेष्टीकां यूरेडेचयमन्त्रिराट् ।
लक्ष्मीधरकटाक्षेण कुरुते गुरुतेजसा ॥

श्रीमद्वायुपुराणे ब्रह्मप्रोक्तं श्रीनीलकण्ठस्तोत्रं व्याख्यास्यामः—

ओं नमो भगवते रुद्राय महादेवाय नीलकण्ठाय नमः ।

अथात्मानं शिवात्मानं पञ्चास्यं चिन्तयेद् द्विजः ।
त्रिणेत्रं च चतुर्बाहुं सर्वालंकारभूषितम् ॥
नीलग्रीवं शशाङ्काङ्कं शुद्धस्फटिकसन्निभम् ।
नागयज्ञोपवीतं च व्याघ्रचर्मोत्तरीयकम् ॥

* * * *

श्रुत्वा वाक्यं ततस्तस्याः पार्वत्याः पार्वतीप्रियः ।
कथां मङ्गलसंयुक्तां कथयामास शङ्करः ॥

हे भगवन् महानुभाव ; यद्वा भगवच्छब्देन भकारो भववाचकः गकारो योगवाचकः भकारगकाराभ्यामन्तादिवर्णलोपात् भवयोगावुच्येते । तद्वयमर्थः—भवं निहत्य योगं ददाति इति भगवान् भवनिर्हरणयोगदाने देवत्वेन यस्य स्त इति भगवान् ।

End:

अथ जैमिनिरुवाच—

श्रुतं महापापहरं महाफलं निवेद्य दित्यै प्रययौ प्रभञ्जनः ।
अधीत्य सर्वं सकलं सलक्ष्यं जगाम सादित्यपदं द्विजोत्तमाः ॥

हे द्विजोत्तमाः परमेश्वरात् श्रुतं महाफलं महापापहरं स्तोत्रं दित्यै निवेद्य प्रभञ्जनो वायुः स्वलोकं प्रययौ सा दितिः सर्वं कृत्स्नं सकलं सार्थ(र्थं)म् सलक्ष्यं लक्ष्ययुक्तं लक्ष्यः परमेश्वरः तद्युक्तं स्तोत्रं जगामेत्यन्वयः । अथ स्तोत्रस्य उत्पत्तिस्थानं पुराणं सप्रकारमाह—

Colophon:

इति श्रीमद्वायुपुराणे उमामहेश्वरसंवादे ब्रह्मनोक्तं श्रीनीलकण्ठस्तोत्रं संपूर्णम् ॥

नीलकण्ठस्तुतेष्टीकामकरोदाकरो गिराम् ।
लक्ष्मीधरकटाक्षेण पूरेडेचनमस्विराट् ॥

वचोदेवी विपश्चीशस्तुतिपञ्चकपत्रिका ।
असङ्खारं प्रपञ्चस्य विरिञ्चेरियमस्तु ॥

The transcription of Mahimnastōtra, Malhanastōtra, Anāmayastōtra, Halāyudhastōtra and Nīlakaṇṭhastōtra with their commentaries is said to have been completed by Mallēśa, son of Saryi Niṭṭala Rāmayya, on Wednesday, the 15th of Āśvayuja bright fortnight in the year Kīlaka.

No. 11043. पञ्चक्रोशयात्रामञ्जरी.
PAÑCAKROŚAYĀTRĀMAÑJARĪ.

Pages, 12. Lines, 6 on a page.

Begins on fol. 1a of the MS. described under No. 408.

Complete.

In praise of the sacred place Vārāṇasī, which is situated between two channels named Varāṇa and Asi and which is said to cover a distance of 5 Krōśas: by Saṅkarānandatīrtha, a disciple of Śivanārāyaṇānandatīrtha.

Beginning :

समीहितार्थदानदक्षपक्षिवाहनाब्जसं-
मवोक्षकेतनादिवाञ्छितार्थदायिनम् ।
निलिम्पशेखरं प्रभुं दयालवालपुत्रकं
रसालमूलवासिनं भजामि विघ्ननायकम् ॥

* * * *

समस्तवेदवेदिपु(षु)प्रशस्तयोगिपट्पदं
निरस्तलोभमोहनादिमस्तके विराजितम् ।
विशुद्धधीजनावलीविनोदमोदभासकं
सदाशिवार्यपादकञ्जमञ्जसा भजाम्यहम् ॥

श्रीसदाशिवपादाब्जं नत्वा कश्चित्तदाज्ञया ।
पञ्चक्रोशस्य यात्रां वै कर्तुं धुण्डिमथास्तुवत् ॥

एवं निखिलनिलिम्पपरिवृढपरिपूजितसुन्दरचरणारविन्दं श्रीधुण्डिराजं नत्वा नियमासनेन पूर्वदिनमुषित्वा काल्य उत्थाय कृतनिखिलनित्य नैमित्तिकः सकलजगदुदयस्थितिलयनिदानं विश्वेश्वरं प्रस्तौति—

एवं सञ्चिन्त्य विश्वेशं भक्त्या परमया मुदा ।
मणिकर्णीजले स्नात्वा गातुं समुपचक्रमे ॥

End :

जय संसारभयोद्विग्नजनतापविमोचन ।
प्रसीद मम सर्वेश शरणागतवत्सल ॥

कृतजापेन कृपया मया क्षेत्रप्रदक्षिणः ।
सुप्रीतो भव सर्वेश निष्किञ्चनजनप्रिय ॥

पञ्चक्रोशस्य यात्राख्या मञ्जरी सन्मुदावहा ।
श्रीशम्भुनामकुसुमैः भक्तसौगन्ध(न्ध्य)गन्धितैः ॥

मनोहरसुसंदृब्धा कृपया निर्व्यलीकया ।
श्रीगुरोः परमानन्दपदनिःश्रेणिका मया ॥

Colophon :

इति श्रीशिवनारायणानन्दतीर्थगुरुचरणसेवकशङ्करानन्दतीर्थविरचित-पञ्चक्रोशयात्रामञ्जरी सम्पूर्णा ॥

No. 11044. पञ्चमुखस्तोत्रम्.

PAÑCAMUKHASTŌTRAM.

Pages, 3. *Lines*, 6 on a page.

Begins on fol. 51*b* of the MS. described under No. 5537.

Complete.

A eulogy on the five faces of Śiva, viz., Tatpuruṣa, Aghōra, Sadyōjāta, Vāmadēva and Īśāna.

Beginning :

प्रातर्बालदिवाकरारुणनिभं बन्धूकपुष्पद्युति
श्रीमद्घोषसहस्रपत्रकमलं(लं) कर्णिकनीलोत्पलम् ।

वह्निज्वालशिखाकलापजटिनं भस्माङ्गरागोद्भवं(ज्ज्वलं)
नित्यं तत्पुरुषं शिवस्य महितं पूर्वं मुखं पाहि(तु) माम् ॥

End:

यस्सान्तं नादमध्यं न निधननिधनं नैव रात्रश्च चाहः
न स्वप्नं(प्नं)नैव जाग्रत् न निमिषनिमिषं नैव दुःखं न सौख्यम् ।
रूपं गन्धानुलेपं न मलिनमलिनं शुद्धमाकाशरूपं
तच्छान्तं विश्वरागं परमशिवमयं योगिहृद्ध्यानगम्यम् ॥

Colophon:

इति पञ्चमुखस्तोत्रम् ॥

No. **11045.** पञ्चमुखस्तोत्रम्.

PAÑCAMUKHASTÔTRAM.

Pages, 3. Lines, 7 on a page.

Begins on fol. 21*b* of the MS. described under No. 3178, wherein it is called Pañcavaktrastava in the list of other works.

Complete.

Same work as the above, but with the additional stanzas at the end as given below :—

End:

एतानि पञ्च वदनानि महेश्वरस्य ये कीर्तयन्ति मनुजाः सततं त्रिकाले ।
गच्छन्ति ते शिवपदं रुचिरैर्विमानैः क्रीडन्ति शङ्करगणैः सततं शिवं नः ॥
शम्भो शशाङ्ककृतशेखर शान्तमूर्ते गङ्गाधरामरवरार्चितपादपीठ ।
नागेन्द्रभूषण नगेन्द्रनिकेतनेश भक्तार्तिहन् मयि निधेहि कृपाकटाक्षम् ॥
विश्वेश विश्वविलयस्थितिजन्महेतो विश्वेशवेद्य शिव शाश्वत विश्वरूप ।
विध्वस्तकालभववीतगुणावभास श्रीमन्महे(श) मयि नि धेहि कृपाकटा
[क्षम् ॥
श्रीविश्वनाथ करुणाकर शूलपाणे शम्भो गिरीश शिव शङ्कर चन्द्रमौले ।
श्रीनीलकण्ठ मदनान्तक विश्वमूर्ते गौरीपते मयि निधेहि कृपाकटाक्षम् ॥

No. 11046. पञ्चमुखस्तोत्रम्.
PAÑCAMUKHASTOTRAM.

Pages, 2. Lines, 6 on a page.

Begins on fol. 27*a* of the MS. described under No. 8706.

Incomplete ; contains only four stanzas.

Similar to the above.

Beginning :

संवर्ताग्नितटित्प्रतप्तकनकप्रस्पर्धितेजोऽरुणं
गम्भीरध्वनिसामघोषविलसद्प्रोच्छ्वासिताथर्वणम् ।
अर्धेन्दुद्युतिलोलपिङ्गलजटाभारप्रबद्धोरगं
वन्दे सिद्धसुरासुरेन्द्रविनुतं पूर्वं मुखं शूलिनः ॥

End :

गौरं कुङ्कुमपिञ्जरं सुतिलकं व्यापाण्डुगण्डस्थलं
भ्रूविक्षेपकटाक्षवीक्षणलसत्संसक्तकर्णोत्पलम् ।
याजुर्वेदसमाषितं प्रणवितं नीलालकालङ्कृतं
(वन्दे पूर्णशशाङ्कमण्डलनिभं वक्त्रं हरस्योत्तरम्) ॥

No. 11047. पञ्चमुखस्तोत्रम्.
PAÑCAMUKHASTOTRAM.

Pages, 2. Lines, 8 on a page.

Begins on fol. 127*a* of the MS. described under No 119.

Complete ; contains nine stanzas of which one stanza contains Phalaśruti (or benedictions).

Slightly different from the above; the stanzas here are arranged in a different order.

Beginning :

प्रालेयामलमिन्दुकुन्दधवलं गोक्षीरफेनप्रभं
भस्माभ्यङ्गमनङ्गजातदहनज्वालावलीलोचनम् ।

ब्रह्मेन्द्रादिमरुद्गणैः(ण)स्तुतिपदम् ऋग्वेदनादोदयं
वन्देऽहं सकलङ्कमङ्करहितं शम्भोर्मुखं पश्चिमम् ॥

End:

एतानि पञ्च वदनानि महेश्वरस्य
ये कीर्तयन्ति मनुजाः सततं त्रिकाले ।
संसारसागर . . . .
. . . . रुचिरैर्विमानैः ॥

Colophon:

इति पञ्चमुखस्तोत्रं सम्पूर्णम् ॥

No. **11048.** पञ्चलिङ्गस्तोत्रम्.

PAÑCALIṄGASTŌTRAM.

Pages, 8. Lines, 5 on a page.

Begins on fol. 25a of the MS. described under No. 17, wherein it is wrongly called Ekāmbarēśvarāṣṭaka in the list of other works.

Complete.

In praise of the five kinds of Śivaliṅgas found in the five sacred shrines of Śiva, viz., Kāñcīpuram, Tiruvānaikkāval, Tiruvaṇṇāmalai, Kālahasti and Cidambaram, and manifested in the five elements, viz., earth, water, fire, air and ether.

Beginning:

ताम्रयुज्वलेपितं दिगम्बररूपशोभितं वनभ्रमणविहारितं विडम्बताण्डवं नटम् ।
धूम्रयुक्तलोचनं सधूम्रदिव्यभावितं महाम्रतिष्ठमूर्तिमेकाम्बरेश्वरं भजे ॥

End:

अम्बुजासनार्चितं विडम्बमानसोज्वलं
कराम्बुजाम्बुधीश्वरं महाम्बुशक्तिधारिणम् ।
कुम्भिनीमहारथं जम्भभेदिवन्दितं
त्रियम्बिकुम्भिकाधवं चिदम्बरेश्वरं भजे ॥

वटविटपिसमीपे भूमिभागे निषण्णं सकलमुनिजनानां ज्ञानदातारमारात् ।
त्रिभुवनगुरुमीशं दक्षिणामूर्तिदेवं जननमरणदुःखच्छेददक्षं नमामि ॥

No. 11049. पञ्चलिङ्गस्तोत्रम्.
PAÑCALINGASTOTRAM.

Pages, 3. Lines, 5 on a page.

Begins on fol. 279b of the MS. described under No. 7247, wherein it is wrongly given as Ekambareśvarāṣṭaka in the list of other works

Complete.

Same work as the above.

No. 11050. पञ्चवक्त्रस्तोत्रम्.
PAÑCAVAKTRASTOTRAM.

Page, 1. Lines, 8 on a page.

Begins on fol. 128b of the MS. described under No. 119.

Complete.

In praise of Śiva. Herein each of the letters of the Pañcākṣaramantra is associated with each of the five faces of Śiva and with a particular complexion.

Beginning:

क्षीराय क्षीरवर्णानां सद्योजाताय पश्चिमे ।
नागेन्द्रहाराय त्रिलोचनाय भस्माङ्गरागाय महेश्वराय ।
(देवादिदेवाय दिगम्बराय) तस्मै नकाराय नमः शिवाय ॥
जपाकुसुमवर्णानां वामदेवाय आत्मने ।
मातङ्गचर्माम्बरभूषणाय समस्तगीर्वाणगणार्चिताय ।
त्रियम्बकाये च त्रिलोचनाय तस्मै मकाराय नमः शिवाय ॥

End:

नमः शिवाभ्यां परमप(प्र)दाभ्यां नमःशिशवाभ्यां नवयौवनाभ्याम् ।
नमःशिवाभ्यां जगदेकचक्षुषे नमः शिवायै च नमश्शिवाय ॥

Colophon:

पञ्चवक्त्रस्तोत्रं सम्पूर्णम् ॥

No. 11051. पञ्चाक्षरस्तोत्रम्.
PAÑCĀKṢARASTOTRAM.

Page, 1. Lines, 7 on a page.

Begins on fol. 21a of the MS. described under No. 3178.

Complete.

A eulogy on Śiva by commenting upon and explaining each of the letters of the Pañcākṣara, the well-known five-syllabled prayer formula relating to Śiva.

Beginning:

वेदादिमूलं सकलस्वराणां त्रयोदशत्वं शशिबिन्दुरूपम् ।
वेदान्वित सूत्रभुजङ्गरूपं त्रिधात्ममूलं प्रणवस्वरूपम् ॥
नानाज्वरव्याधिविनाशनाय नाथाय लोकस्य जगद्धिताय ।
नानागमज्ञाननिदर्शनाय तस्मै नकाराय नमः शिवाय ॥

End:

यक्षोरगेन्द्रेण सुरद्रुमाय यज्ञाग्निहोत्राय हिमाचलाय ।
यक्षीणिरूपाय जगद्धिताय तस्मै यकाराय नमश्शिवाय ॥
नमः शिवाय साम्बाय सगुणाय ससूनवे ।
सनन्दिने सगङ्गाय सवर्षाय नमो नमः ॥

No. 11052. पञ्चाक्षरस्तोत्रम्.
PAÑCĀKṢARASTOTRAM.

Pages, 2. Lines, 8 on a page.

Begins on fol. 126a of the MS. described under No. 119.

Complete.

Similar to the above.

Beginning:

नानाज्वरव्याधिविनाशनाय नाथाय लोकाय जगद्धिताय ।
नानाकळज्ञाननिदर्शनाय तस्मै नकाराय नमश्शिवाय ॥

End:

पञ्चाक्षरमिदं स्तोत्रं पवित्रं पापनाशनम् ।
चिन्तयेन्मनसा नित्यं शिवलोके महीयते ॥

Colophon:

इति पञ्चाक्षरस्तोत्रं सम्पूर्णम् ॥

No. 11053. पञ्चाक्षरस्तोत्रम्.

PAÑCĀKṢARASTŌTRAM.

Page, 1. Lines, 9 on a page.

Begins on fol. 29*a* of the MS. described under No. 120. Complete.

Slightly different from the above and without the colophon.

No. 11054. पञ्चरत्नस्तोत्रम्.

PAÑCARATNASTŌTRAM.

Page, 1. Lines, 19 on a page.

Begins on fol. 50*b* of the MS. described under No. 2880. Complete.

Five stanzas in praise of Śiva by elaborating and explaining each of the syllables forming the Pañcākṣaramantra.

Beginning:

ओंकारबीजसंयुक्तं नित्यं ध्यायन्ति योगिनः ।
कामदं मोक्षदं चैव ओंकाराय नमो नमः ॥
नागेन्द्रहाराय नमस्त्रिणेत्रिणे भस्माङ्गरागाय महोज्वलाय ।
देवादिदेवाय दिगम्बराय तस्मै नकाराय नमश्शिवाय ॥

End:

यज्ञस्वरूपाय जटाधराय पिनाकहस्ताय सनातनाय ।
नित्याय शुद्धाय निरञ्जनाय तस्मै यकाराय नमश्शिवाय ॥

पञ्चरत्नमिदं पुण्यं यः पठेच्छिवसन्निधौ ।
स याति परमं स्थानं यत्र देवो महेश्वरः ॥

Colophon:

इति श्रीशङ्कराचार्यविरचिते(तं) पञ्चरत्नस्तोत्रं संपूर्णम् ।

No. 11055. पट्टिशशैलपत्यष्टकम्.

PAṬṬIŚAŚAILAPATYAṢṬAKAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 30*b* of the MS. described under No. 781.

Complete.

In praise of the sacred Śaiva shrine in *Paṭṭiśa*, probably the same as a place of this name in the Gōdāvari district.

Beginning:

कैलासभूधरनिकेतनमप्रमेयं व्यासादियोगिजनवन्दितपादपद्मम् ।
मित्रानिलात्मसरसीरुहवैरिनेत्रं श्रीपट्टिशशै(शाच)लपतिंप्रणतोऽस्मि नित्यम् ॥

End:

श्रीनाथनेत्रसरसीरुहपूजिताङ्घ्रिं कर्पूरहारसमुदञ्चितचारुहासम् ।
सामादिवेदवरघोटकमद्रिनूणं श्रीपट्टिशशै(च)लपतिं प्रणतोऽस्मि नित्यम् ॥

इदं शिवाष्टकं पुण्यं भवसागरवारणम् ।
पठेत् ज्ञानवान् भक्त्या शिवसायुज्यमा(माप्नु) भवेत् ॥

No. 11056. पतञ्जलिस्तोत्रम्.

PATAÑJALISTŌTRAM.

Pages, 3. Lines, 6 on a page.

Begins on fol. 6*b* of the MS. described under No. 8609.

Complete.

A eulogy on Śiva, said to have been made by Patañjali.

Beginning :

सुवर्णपद्मिनीतटान्तदिव्यहर्म्यवासिने
सुपर्णवाहनप्रियाय सूर्यकोटितेजसे ।
अपर्णया विहारिणे फणाधरचन्द्रधारिणे
सदा नमश्शिवाय ते सदाशिवाय शम्भवे ॥ १ ॥

End :

मधुरिपुविधिशक्रमुख्यदेवैरपि नियमार्चितपादपङ्कजाय ।
कनकगिरिशरासनाय तुभ्यं रजतसभापतये नमश्शिवाय ॥

Colophon :

पतञ्जलिस्तोत्रं सम्पूर्णम् ॥

No. **11057.** पतञ्जलिस्तोत्रम्.
PATAÑJALISTÔTRAM·

Pages, 2. Lines, 6 on a page.

Begins on fol. 100*a* of the MS. described under No. 115, wherein it is called Sundarêśvarastôtra in the list of other works.

Incomplete.

Same work as the above.

No. **11058.** पतञ्जलिस्तोत्रम्.
PATAÑJALISTÔTRAM.

Pages, 5. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 9372 wherein it is called Sundarêśvarastôtra in the list of other works.

Complete.

Same work as the above, but with the addition of one stanza at the end as given below :—

हालास्यनाथाय महेश्वराय हालाहलालङ्कृतकन्धराय ।
मीनेक्षणायाः पतये शिवाय नमो नमः सुन्दरताण्डवाय ॥

No. 11059. पतञ्जलिस्तोत्रम्.
PATAÑJALISTÔTRAM.

Pages, 2. Lines, 6 on a page.

Begins on fol. 7a of the MS. described under No. 9022, wherein it is called Pañcacâmarastôtra in the list of other works

Complete.

Same work as the above

No. 11060. पतञ्जलिस्तोत्रम्.
PATAÑJALISTÔTRAM.

Pages, 2. Lines, 8 on a page.

Begins on fol. 60b of the MS. described under No. 10940.

Complete.

Same work as the above, but with one additional stanza at the end as given below :—

त्वया कृतमिदं स्तोत्रं यः पठेद्भक्तिसंयुतः ।
तस्यायुर्दीर्घमायुष्यं सम्पदश्च ददाम्यहम् ॥

Colophon :

इति हालास्यमाहात्म्ये पतञ्जलिस्तोत्रं सम्पूर्णम् ॥

No. 11061. परमेश्वरजयस्तोत्रम्.
PARAMÊŚVARAJAYASTÔTRAM.

Substance, palm-leaf. Size, 9¼ × 1½ inches. Page, 1. Lines, 8 on a page. Character, Telugu and Kanarese. Condition, injured. Appearance, old.

Begins on fol. 1a. The other works herein are Śivabhujaṅga 1a, Viśvanâthâṣṭaka 4a, Mahimnastava 5a.

Complete.

A number of eulogistic stanzas on Paramêśvara or Śiva, repeated by the suppliant with a view to remove his sins and to secure His protection.

Beginning:

जय देव जगन्नाथ जय शङ्कर शाश्वत ।
जय सर्वसुराध्यक्ष जय सर्वसुरार्चित ॥

End:

जय योगासनारूढ जय योगीश्वरार्चित ।
जय दुस्त[ा]रसंसारसागरोत्तारण प्रभो ॥
प्रसीद मे महादेव संसारार्तस्य खिद्यतां(तः) ।
सर्वपापक्षयं कृत्वा रक्ष मां परमेश्वर ॥

No. **11062.** पुत्रप्रदस्तवः.

PUTRAPRADASTAVAḤ.

Pages, 1. Lines, 21 on a page.

Begins on fol. 88*a* of the MS. described under No. 118.

Complete.

This is a eulogy on God Śiva, the due repetition of which for a year accompanied with the worship of the Śivaliṅga is held to have the power to enable a person to beget a son.

Beginning:

मम पुमपत्यप्रतिबन्धरूपदुरितनिवृत्तिद्वारा आयुष्मत्सुरूपानेकसुपुत्रावाप्त्यर्थं श्रीपरमेश्वरप्रसादनेऽर्थे विनियोगः ।

काश्यप उवाच—

पाहि धर्मवृषारूढ पाहि देवत्रयेक्षण ।
पाहि शङ्कर देवेश पाहि लोकनमस्कृत ॥
पाहि पावन गौरीश पाहि पन्नगभूषण ।
पाहि गोघन लक्ष्मीश पाहि पर्वतजावर ॥

End:

प्रातरुत्थाय सुस्नातः लिङ्गमभ्यर्च्य शाम्भवम् ।
वर्षं जपमि(न्नि)दं स्तोत्रमपुत्रः पुत्रवान् भवेत् ॥

• • • •

स्त्रियो वा पुरुषो (वा)पि नियमालि लिङ्गसन्निधौ ।
अब्दं जप्तमिदं स्तोत्रं पुत्रदं नात्र संशयः ॥

No. 11063. पुत्रप्रदस्तवः.
PUTRAPRADASTAVAH.

Pages, 3. Lines, 6 on a page.

Begins on fol. 91*b* of the MS. described under No. 119.
Complete.

Same work as the above, but with the addition of the under mentioned colophon :—

Colophon :

इति काशिकाखण्डो(ण्डे) अभिलाषाष्टकस्तोत्रं संपूर्णम् ॥

No. 11064. प्रदोषस्तोत्रम्.
PRADŌṢASTŌTRAM.

Pages, 4. Lines, 5 on a page.

Begins on fol. 74*a* of the MS. described under No. 2118.
Complete.

A eulogy on God Śiva to be repeated specially during the Pradōṣa time.

Beginning :

सत्यं ब्रवीमि परलोकहितं ब्रवीमि
सारं ब्रवीमिचेद(म्युप)निषद(द्र)दयं ब्रवीमि ।
संसारमुल्बणमसारमपास्य जन्तोः
सारोऽयमीश्वरपदाम्बुरुहस्य सेवा ॥

End :

गन्धर्वयक्षगरुडोरगसिद्धसाध्यविद्याधराषु(मु)रगणाप्सरसां गणाश्च ।
यस्य त्रिलोकनिलये सह भूतवर्गा प्राप्ते प्रदोषसमये हरपार्श्वसंस्थाः ॥

* * * * *

अतो दारिद्र्यमापन्नं पुत्रस्ते द्विजभामिनि ।
तद्दोषपरिहारार्थं शरणं याहि शङ्करम् ॥

No. 11065. प्रातस्स्मरणीयपञ्चरत्न स्तोत्रम्.

PRĀTASSMARAṆĪYAPAÑCARATNASTŌTRAM

Pages, 2. Lines, 5 on a page.

Begins on fol. 24a of the MS. described under No. 764.

Complete.

Five stanzas in praise of God Śiva enjoined to be repeated by His devotees early morning as soon as they get up from their bed. Such a repetition with due devotion is believed to be efficacious in enabling one to enjoy the various pleasures of life and in obtaining Kailāsa which is Śiva's abode.

Beginning :

प्रातः स्मरामि परमेश्वरवक्त्रपद्मं फालेक्षणानलविशोषितपञ्चबाणम् ।
भस्मत्रिपुण्ड्रललितं मणिकुण्डलाढ्यं कुन्देन्दुचन्दनसुधारसमन्दहासम् ॥

End :

यत्पञ्चरत्नानि महेश्वरस्य भक्त्या पठेद्यश्च कृति प्रभाते ।
भुक्त्वा पराणां विविधांश्च भोगान् प्राप्नोति कैलासपदं दुरापम् ॥

No. 11066. प्रातस्स्मरणीयपञ्चरत्नस्तोत्रम्.

PRĀTASSMARAṆĪYAPAÑCARATNASTŌTRAM

Page, 1. Lines, 5 on a page.

Begins on fol. 52a of the MS. described under No. 1582.

Complete.

Slightly different from the above.

No. 11067. प्रातस्स्मरणीयपञ्चरत्नस्तोत्रम्.

PRĀTASSMARAṆĪYAPAÑCARATNASTŌTRAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 27a of the MS. described under No. 2418.

Complete.

Same work as the above, but with a different end which is given below.

End:

> प्रातर्वदामि परमेश्वरपुण्यनाम
> श्रियः श्रि(श्रेयः)प्रदं सकलदुःखविनाशदं(क)म् ।
> संसारतापशमनं कलिकल्मषघ्नं
> गोकोटिदानफलदं स्मरणेन पुंसाम् ॥

Colophon:

> इति श्रीपञ्चरत्नानि महेश्वरस्य भक्त्या पठे(दे)वम्.

No. 11068. प्रातस्स्मरणीयपञ्चरत्नस्तोत्रम्.

PRÂTASSMARAṆÎYAPAÑCARATNASTÔTRAM.

Pages, 2. Lines, 7 on a page.

Begins on fol. 57*a* of the MS. described under No. 5987.
Complete.
Similar to the above.

Beginning:

> प्रातस्स्मरामि गिरिजेशमुखारविन्दं
> भोगीन्द्रकुण्डलविराजितगण्डभागम् ।
> गम्भीरभावविशदस्मितमायताक्षं
> भास्वद्विशालनिटिलं शशिकोटितुल्यम् ॥

End:

> यः श्लोकपञ्चकमिदं पठति प्रभाते
> घोराघनाशनमशेषशुभक्रिया(व)ह(हं)म् ।
> प्राप्य स्वपुत्रपशुलाभमिह प्रपञ्चे
> शैवीं प्रयाति गतिमङ्कविनाशने सः ॥

Colophon:

> इति पञ्चरत्नस्तवः सम्पूर्णः ॥

No. 11069. बाणाष्टकम्.
BĀṆĀṢṬAKAM.

Pages, 2. Lines, 6 on a page.

Begins on fol. 38*b* of the MS. described under No. 781.

Complete.

Eight stanzas in praise of God Śiva by Bhaṭṭabāṇa.

Beginning:

श्रीमत्कपर्दितटिनीतटशोभनाय
शीतांशुरेख(खण्ड)पारेकल्पितशेखराय ।
नित्याय निर्मलगुणाय निरञ्जनाय
नीहारहारधवलाय नमः शिवाय ॥

End:

लोकत्रयाच्च(र्त्ति)हरणोत्सुकमानसाय
लोकत्रयार्चितपदाय जगन्मना(या)य ।
श्रीप(भ)ट्टबाणक(विसू)क्ते)विराजिताय
कैवल्यदाननिपुणाय नमः शिवाय ॥

No. 11070. बाणाष्टकम्.
BĀṆĀṢṬAKAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 27*a* of the MS. described under No. 6600.

Complete.

Same work as the above.

No. 11071. बिल्हणस्तवः.
BILHAṆASTAVAḤ.

Pages, 9. Lines, 5 on a page.

Begins on fol. 3*a* of the MS. described under No. 8708

Complete.

Stanzas in praise of God Śiva by the poet Bilhaṇa, the repetition of which is held to be efficacious in bestowing long life, health, progeny, etc.

Beginning:

सन्तु सहस्रं देवास्तद्गुणदोषोक्तिभिः किमस्माकम् ।
शिवमेव वर्णयामः पुनरपि शिवमेव शिवमेव ॥

मत्से मूर्ध्नि सुधामयूखशकलं श्लाघ्यं कपालस्रजं
वक्षस्यद्रिसुताकुचागरुरवस्सान्द्रं चिताभस्म च ।
तद्वाणादिकविप्रणीतललितस्तोत्रप्रबन्धप्रिये
त्वत्कर्णे लभतामयं मम गिरां गुम्भोऽपि संभावनाम् ॥

End:

वासः शुभ्रमृतुर्वसन्तसमयः पुष्पं शरन्मल्लिका
धावन्तः(नुष्कः) कुसुमायुधः परिमलं कस्तूरिकास्त्रं धनुः ।
वाणी तर्करसोज्ज्वला प्रियतमा श्यामा वयो यौवनं
मार्गः शाङ्कर एव पवनिलया गीतिः कविर्बिल्हणः ॥
ये बिल्हणाह्वयकवीश्वरसंप्रणीता-
मेतां स्तुतिं शिवमुदेऽन्वहमामनन्ति ।
ते प्राप्नुवन्ति पुरुषायुषमात्मविद्या-
मारोग्यमष्टतनयानखिलार्थसिद्धिम् ॥

Colophon:

इति बिल्हणस्तवः संपूर्णः ॥

No. **11072.** बिल्हणस्तवः.

BILHAṆASTAVAḤ.

Pages, 6. Lines, 9 on a page.

Begins on fol. 156*b* of the MS. described under No. 119 and not on fol. 156*a* as stated therein.

Complete.

Same work as the above.

No. 11073. बिल्हणस्तवः.
BILHAṆASTAVAḤ.

Pages, 12. Lines, 6 on a page.

Begins on fol. 13*a* of the MS. described under No. 2550.

Complete.

Same work as the above

No. 11074, बीजभैरवाष्टकम्.
BĪJABHAIRAVĀṢṬAKAM.

Pages, 3. Lines, 7 on a page.

Begins on fol. 11*b* of the MS. described under No. 5787

Complete.

Same work as that described under R.No. 488(*s*) of the Triennial Catalogue of MSS., Vol. I, Part I-B, but with the addition of the following stanza at the end:—

End:

भैरवस्याष्टकं पुण्यं षण्मासं यः पठेन्नरः ।
प्राप्नोति परमं स्थानं यत्र देवो महेश्वरः ॥

No. 11075. बीजभैरवाष्टकम्.
BĪJABHAIRAVĀṢṬAKAM

Pages, 4. Lines, 6 on a page.

Begins on fol. 51*a* of the MS. described under No. 5685, wherein it is given as Bhairavāṣṭaka in the list of other works.

Complete.

Same work as the above.

No. 11076. बीजभैरवाष्टकम्.
BĪJABHAIRAVĀṢṬAKAM.

Pages, 5. Lines, 5 on a page.

Begins on fol. 58*b* of the MS. described under No. 2550.

Complete.

Same work as the above, but without the additional stanza at the end.

No. 11077. भृङ्गीस्तवः.

BHṚṄGĪSTAVAḤ.

Pages, 10. Lines, 8 on a page.

Begins on fol. 138*a* of the MS. described under No. 119.

Complete.

Stanzas of praise addressed to Śiva probably by one of Śiva's attendants praying for protection

Beginning :

शम्भो शङ्कर शान्त शाश्वत शिव स्थाणो भवोमापते
भूतेश त्रिपुरान्तक त्रिणयन श्रीकण्ठ कालान्तक ।
शर्वोग्रामव भर्ग भीम जगतां नाथाक्षर श्रीनिधे
रुद्रेशान महेश्वरेश्वर महादेवेश तुभ्यं नमः ॥ १ ॥

*   *   *   *

क्रूरं कष्टतमं विनष्टमनसं भ्रष्टं शठं निष्ठुरं
निर्लज्जं कृपणं कृतघ्नमशुचिं बह्वाशिनं हिंसकम् ।
आशापाशशतप्रबद्धमनसं दुष्कीर्तिभाजं जडं
कारुण्याकर भो पितः पशुपते दोषाकरं पाहि माम् ॥ २ ॥

End :

अत्यावेशिनमुत्तमस्थितिमतां सेत्यागिनं नास्तिकं
रन्ध्रान्वेषिणमन्धमूकबधिरं शम्भोस्तु विश्वात्मनः ।
माहात्म्यश्रवणस्तुतीक्षणविधौ माहेश्वरावत्सलं
कारुण्याकर भो पितः पशुपते दोषाकरं पाहि माम् ॥ ९३ ॥

No. 11078. मलयराजस्तोत्रम्.

MALAYARĀJASTŌTRAM.

Pages, 17. Lines, 6 on a page.

Begins on fol. 35*b* of the MS. described under No. 10900.

Complete.

A devotional eulogy on Śiva said to have been made by Malayarāja with a view to secure to himself long life

Beginning:

यो न धियामधिगम्यस्तस्य कुतः सम्भवो गिरां वृत्तेः ।
स्तौमि तथापि भवन्तं मनोरथो यात्यभूमिमपि ॥
यामि मनोवाक्कायैः शरणं करुणाकरं जगन्नाथ ।
जन्मजरामरणार्णवतरणकरण्डं तवाङ्घ्रियुगम् ॥
सर्वत एव श्रुतिमान् सर्वगतश्चेति गीयसे सद्भिः ।
अत इदमर्हसि भगवन् स्थाणो कृपणाद्वचः श्रोतुम् ॥

End:

इति रचयति स्म भगवत इन्दुकलाशेखरस्य मलयाख्यः ।
भक्त्या भक्तिस्तोत्रं भवे भवे भक्तिरेवास्तु ॥

Colophon:

इति मलयराजस्तुतिः समाप्ता ॥

No. 11079. मलयराजस्तोत्रम्—सव्याख्यानम्.

MALAYARĀJASTŌTRAM WITH COMMENTARY.

Pages, 32. Lines, 8 on a page.

Begins on fol. 44a of the MS. described under No. 10909.

Complete.

The same as the above, but together with a commentary. The story given herein is that a king named Dēvarāja prayed to Śiva for progeny, and, on being given the option of having many bad sons of long life or one good son who would live only for sixteen years, he preferred to have the latter gift. Accordingly a good son, named Malayarāja, was born; and the story says that he, coming to know the short duration of his life, prayed to Śiva in seventy-one stanzas and secured thereby long life and prosperity.

Beginning:

पुत्रकामो देवराजो नाम राजा समार्यः परमेश्वरं प्रसाद्य पुत्रं ययाचे—शिव पुत्रं देहीति । स चाह—शतायुषो दुर्जनान् बहुपुत्रान्

ददामि वा, षोडशायुषं सज्जनपुत्रमेकं ददामि वेति। तदा देवराज आह—

कोऽर्थोऽस्ति बहुभिः पुत्रैर्गणनापूरणात्मकैः।
वरमेकः कुलालम्बी यत्र विश्रमते कुलम्॥

अतः षोडशवर्षायुरपि सलक्षणः सर्वविद्याप्रवीणः पुत्र एक एव दीयतामिति। शिवस्तथास्त्विति पुत्रं दत्वा तिरोदधे। ततो मलयनाम्न-स्तस्य पुत्रस्य षोडशे वर्षे वर्तमाने सति दुःखितेषु पितृमात्रादिषु बन्धुषु मलयराजः स्वस्यायुषः क्षयं ज्ञात्वा एकसप्तत्यार्यावृत्तैरार्यापतिं प्रसाद्य पुनः शतवर्षायुर्लब्ध्वा मातापितृभ्यां सार्धं नवलक्षराज्यैः साकं शिव-पुरमगच्छदिति कथानुसन्धेया॥

यो न धियामधि (. . . . .) यात्यभूमिगपि॥

अथ कविः कालभीतः कालनाशार्थं कालकालं वाङ्मनोऽतीतमगो-चरं परमशिवं भक्त्या स्तुतिं(तं) करोति—य इति। यः शम्भुः धियां बुद्धिभिः नाधिगम्यः न ज्ञातव्यः; कृद्योगे षष्ठी। गिरां वृत्तेः संभवः कुतः। तथाति(पि) मनोरथाभूमिम्; 'यतो वाचो निवर्तन्तेऽप्राप्य मनसा सह' इति श्रुत्या अविषयमपि तं भवं स्तौमीति याति॥

End:

अथ कविः स्वनामधेयं सूचयन् शिवभक्तिस(सिद्धै) स्तुतिं कृत-वानित्याह—इतीति। मलयाख्यः मलयराज इत्याख्या नामधेयं यस्य तथोक्तः कविः भगवतः षड्गुणैश्वर्यसंपन्नस्येन्दुकलाशेखरस्य 'नमश्चन्द्र-ललाटाय कृत्तिवाससे' इति श्रुतेश्चन्द्रशेखरस्य शम्भोर्भक्तिस्तोत्रमष्टविध-भक्तिप्राधान्यस्तवं भवे भवे जन्मनि जन्मनि; आदरार्थे द्विरुक्तिः। भक्तिरेवमष्टविधा इति शेषः। अस्तु भवतु इति भक्त्या श्रद्धया रच-यति स्म चकार। भक्तिस्तोत्रमित्यत्र सर्वस्तवोत्तरत्वं सूचितम्॥

No. 11080. मलयराजस्तोत्रम् —कर्णाटकटीकासहितम्.
MALAYARÂJASTÔTRAM WITH KANARESE MEANING.

Substance, Śrîtâla. Size, $8\frac{1}{2} \times 2$ inches. Pages, 42. Lines, 8 on a page. Character, Kanarese. Condition, injured. Appearance, old.

Begins on fol. 27*a*. The other works herein are Malhaṇastava with Kanarese meaning 1*a*, Śivastôtra (Kanarese) 48*a*, Maṇṇiśvarastôtra (Kanarese) 64*a*, Vaidyaviṣaya (Kanarese) 6·*a*.

Contains forty-five stanzas.

Same work as the above, but with Kanarese meaning.

No. 11081. मल्लिकार्जुनस्तोत्रम्.
MALLIKÂRJUNASTÔTRAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 279*a* of the MS. described under Nos. 537 and 7247.

Complete.

A number of eulogistic stanzas on God Mallikârjuna, a form of Śiva worshipped in the hill known as Śrîśailam in the Kurnool district.

Beginning:

श्रीकण्ठादिसमस्तरुद्रनमितो वामार्धजानिः शिवः
प्रालेयाचलहारहीरकुमुदक्षीराब्धितुल्यप्रभा(भः) ।
विष्वक्सेनविधातृमस्तमकुटीरत्नप्रभाभास्वरः
श्रीमत्पर्वतमल्लिकार्जुनमहादेवः शिवो मे गतिः ॥

End:

पातालामरवाहिनीवरजल[:]क्रीडासमेतः सदा
रम्भाकाननवाटिकाविहरणोद्युक्तत्रयीगोचरा(रः) ।
कालाक्षो भ्रमराम्बिकाहृदयपङ्केजातपुष्पंधयः
श्रीमत्पर्वतमल्लिकार्जुनमहादेवः शिवो मे गतिः ॥

No. 11082. मल्लिकार्जुनस्तोत्रम्.
MALLIKĀRJUNASTOTRAM.

Pages, 4. Lines, 6 on a page.

Begins on fol. 24a of the MS. described under No. 17, wherein it is given as Śivōmāgāyatryaṣṭaka in the list of other works.

Complete.

Same work as the above.

No. 11083. मल्लिकेश्वरगद्यम्.
MALLIKEŚVARAGADYAM.

Pages, 2. Lines, 7 on a page.

Begins on fol. 25a of the MS. described under No. 764.

Complete.

In praise of the Śivaliṅga on the Śrīśaila hill under various significant attributes which begin with the successive letters of the alphabet.

Beginning:

अखिललोकाधार, आनन्दरसपूर्ण, इनचन्द्रशिखिनेत्र, ईडितामलगात्र, उरुलिङ्गनिजरूप, ऊर्जिताचलचाप,

End:

हरिनेत्रपदपद्म, ळलितमूधरसद्म, क्षररहितचारित्र, अक्षरोग्रस्तोत्र, श्रीपर्वतलिङ्ग नमस्ते नमस्ते नमः ॥

No. 11084. मल्हणस्तवः.
MALHAṆASTAVAḤ.

Pages, 13. Lines, 6 on a page.

Begins on fol. 8a of the MS. described under No. 10969.

Complete.

Same work as that described under R.No 177(j) of the Triennial Catalogue of MSS., Vol. I, Part 1-A.

End:

स्तोत्रं मया कृतमिदं भवतो गणेश वृत्तैर्वसन्ततिलकैः शिव मल्हणेन ।
आयातमत्र कथिते भगवन् दुरुक्तं भक्तिप्रणाममिति सर्वमिदं क्षमस्व ॥

Colophon:

मल्हणस्तुतिः समाप्ता ॥

No. **11085.** मल्हणस्तवः.
MALHAṆASTAVAḤ.

Pages, 3. Lines, 33 on a page.

Begins on fol. 55*b* of the MS. described under No. 1403, wherein it has been omitted to be included in the list of other works.

Complete.

Same work as the above.

No. **11086.** मल्हणस्तवः.
MALHAṆASTAVAḤ.

Pages, 8. Lines, 6 on a page.

Begins on fol. 32*a* of the MS. described under No. 764.

Complete.

Same work as the above.

No. **11087.** मल्हणस्तवः.
MALHAṆASTAVAḤ.

Pages, 6. Lines, 9 on a page.

Begins on fol. 7*a* of the MS. described under No. 120.

Complete.

Same work as the above.

No. **11088.** मल्हणस्तवः.
MALHAṆASTAVAḤ.

Pages, 10. Lines, 5 on a page.

Begins on fol. 8*a* of the MS. described under No. 2559

Complete.

Same work as the above, but without colophon.

No. 11089. मल्हणस्तवः.
MALHAṆASTAVAḤ.

Page, 1. Lines, 5 on a page.

Begins on fol. 95 of the MS. described under No. 10358.

Contains two stanzas only.

Same work as the above.

No. 11090. मल्हणस्तवः.
MALHAṆASTAVAḤ.

Pages, 6. Lines, 8 on a page.

Begins on fol. 159b of the MS. described under No. 119

Complete.

Same work as the above, but with the addition of two stanzas at the end as given below :—

जातिस्मरत्वं पृथिवीपतित्वं सौभाग्यलावण्यमतीव रूपम् ।
शिवेऽतिभक्तिश्चिरमायुरिवे ददातु मे शंकर जन्मजन्मनि ॥
वन्दे इशं(शिवं) विभुमनन्तगुणं महेशं वन्देऽम्बिकातनुमनोहरवामदेहम् ।
वन्देऽञ्जनाभशिवनेत्रकपादरम्यं वन्दे विषोज्ज्वलगलं सदयं ससङ्गः ॥

No. 11091. मल्हणस्तवः—आन्ध्रटीकासहितः
MALHAṆASTAVAḤ WITH TELUGU MEANING.

Pages, 25. Lines, 6 on a page.

Begins on fol. 22a of the MS. described under No. 5500 and not on fol. 21a as stated therein.

Complete.

Same work as the above, but together with Telugu meaning and with the addition of two stanzas at the end as given below :—

अनामय(यो) मांहृमस्य(श्च) मल्हणो विल्हणस्तथा ।
हलायुधं च पञ्चैते यः पठेन्मोक्षसाधनम् ॥
मल्हणेन कृतं स्तोत्रं संपूर्णत्वमियाय तत् ।
गौरीशपादकमलभ्रमरायितचेतसा ॥

No. 11092. मल्हणस्तवः.
MALHAṆASTAVAḤ.

Pages, 9. Lines, 5 on a page.

Begins on fol. 1a of the MS. described under No. 2431.

Complete.

Same work as the above, but with a stanza in the beginning which belongs to the commentary and which is given below :—

ऊरेदेचमहामन्त्री मल्हणस्तुतिपञ्चिकाम् ।
लक्ष्मीधरकटाक्षेण कुरुते गुरुतेसदा(जसा) ॥

No. 11093. मल्हणस्तवः—सव्याख्यः.
MALHAṆASTAVAḤ WITH COMMENTARY.

Pages, 31. Lines, 5 on a page.

Begins on fol. 25a of the MS. described under No. 10912

Complete.

Same work as the above, but together with a commentary by Dēsayāmātya

Beginning :

ऊरेदेचमहामन्त्री मल्हणस्तुतिपञ्चिकाम् ।
लक्ष्मीधरकटाक्षेण कुरुते गुरुतेजसा ॥

अथ मल्हणनामा कविरुमाकान्तं प्रस्तौति—

कान्ताकचप्रचय (. . . .) नमः शिवाय ॥

कान्ताकचेत्यादि[रिति] । कान्तानां मत्तकाशिनीनां कचप्रचयाः केशपाशाः, तेषु पुष्पाणि, तेषु शोभनो गन्धो यस्य सः सुगन्धिः, स चासौ गन्धश्च सुगन्धिगन्धः, पुष्पेषु सुगन्धिगन्धः पराग इति यावत् ।

End :

भक्तिरेव प्रमाणमिति क्षमस्व । भक्तभाषणं बालभाषणमिव न्यूनातिरिक्तावहं न भवति । अपि च भक्तवत्सलस्य प्रेमास्पदमेवेति भक्तवत्सलेन त्वया स्वीकर्तव्यमिति भावः ॥

अकरोदाकरो वाचां मल्हणस्तुतिपत्रिकाम् ।
लक्ष्मीधरकटाक्षेण देचयामात्यशेखरः ॥
मर्यादानतिलङ्घयतामुपगतो गम्भीरशौर्याश्रितो
भूनीभृत्प्रकराश्रितोऽद्भुतमहासत्त्वो न दीनोऽपि च ।
नित्यं वाडवशान्तिमेव विदधन्नानारसाधीश्वरो
वीरेशाकलिदेश(च)राजस(च)गम्भीरब्धिः समुज्जृम्भते ॥
न(हे)(हे)ड्डगोपनृपते पूरदेचप्रधानता ।
कश्चिदर्थः कश्चिन्मैत्रं कश्चिद्धर्मः कश्चेद्यशः ॥

No. 11094. मल्हणस्तवः— सव्याख्यः.

MALHAṆASTAVAḤ WITH COMMENTARY.

Pages, 7. Lines, 8 on a page.

Begins on fol. 167a of the MS. described under No. 10912.

Breaks off in the 7th stanza.

Same work as the above.

This manuscript is said to have been written by one Subbaṇṇā.

No. 11095. मल्हणस्तवः—कर्णाटकटीकासहितः.

MALHAṆASTAVAḤ WITH KANARESE MEANING.

Pages, 52. Lines, 8 on a page.

Begins on fol. 1a of the MS. described under No. 11080.

Complete.

Same hymn as the above, but with Kanarese meaning of which the first stanza and the colophon are hereunder given: by Gurudêva, son of Guruliṅgadêva and grandson of Paṇḍitârâdhyadêva.

चन्द्रार्धमौलिं कालारिं भुजगावलिभूषितम् ।
कण्ठेकालं महादेवं नमामि गिरिजापतिम् ॥

Colophon:

इति श्रीमद्वे(दा)गमोक्तोपनिषत्पुराणक्रममार्गप्रवर्तनप्रवीणपण्डिताराध्य-देवनामधेयवंशोद्भवगुरुलिङ्गदेवनामधेयदेशिकेन्द्रप्रतीकोद्भूतगुरुदेवाख्येन कर्णाटभाषाकृता मल्हणस्तवटीका परिसमाप्ता ॥

No. 11096. महादेवगद्यम्.
MAHÂDÊVAGADYAM.

Pages, 2. Lines, 8 on a page.

Begins on fol. 100*a* of the MS. described under No. 119, wherein this work has been mentioned as Bhargastuti in the list of other works.

Complete.

A prose work consisting of a number of eulogistic attributes addressed to Śiva.

Beginning:

श्रीमन्महादेव, सकलदेवतानिस्तारक, सामरूप, सामवेद सर्वाङ्ग-भस्मा(स्मधा)रक, सनत्कुमारादिमुनिगणवन्द्य, सुन्दर, त्र्यम्बक, त्रिशूलधर।

End:

आद्यन्तरहित, परमात्मन्, परञ्ज्योतिः, भवानीवल्लभ, भक्तवत्सल, शिवकर, शिव, नमस्ते नमस्ते नमस्ते नमः ॥

No. 11097. महादेवगद्यम्.
MAHÂDÊVAGADYAM.

Pages, 2. Lines, 8 on a page.

Begins on fol. 100*b* of the MS. described under No. 119, wherein this work has been mentioned as Bāṇagadyam in the list of other works.

Complete.

Similar to the above.

Beginning:

ओं जय जय, महादेव, महाकाल, महाकालास्पद, महाकालगल, नाकौक(:)प्रत्यनीकनाशकर, नारा(य)णप्रिय, नारदोपगीयमानशुभचरित-

End:

समस्तलोकैकनाथ, शिवाशिव . . . . . नमस्ते नमस्ते नमः।

अपगतपापाय नमः कपिलजटामण्डलेन्दुखण्डाय नमः।

द्विपचर्मपटाय नमस्त्रिपुरमलनाय दैवताय नमः ॥

No. 11098. महादेवस्तोत्रम्.
MAHĀDĒVASTŌTRAM.

Pages, 3. Lines, 5 on a page.

Begins on fol. 2ᵃ1ᵇ of the MS. described under No. 7247

Complete.

A number of stanzas of praise and prayer addressed to Mahadēva or Śiva.

Beginning:

महादेव महादेव महादेवेति वादिनम् ।
वत्सं गौरिव गौरीशो धावन्तमनुधावति ॥

महादेव महादेव महादेवेत्ययं ध्वनिः ।
सुधियो मुक्तिकान्तायाः पाणिग्रहणडिण्डिमः ॥

End:

कोटयो ब्रह्महत्यानामगम्यागमकोटयः ।
सद्यः प्रलयमायान्ति [श्री]महादेवेति कीर्तनात् ॥

* * *

अन्यथा शरणं नास्ति त्वमेव शरणं मम ।
तस्मात्कारुण्यभावेन रक्ष रक्ष महेश्वर ॥
प्रातः काले शिवं दृष्ट्वा निशि पापं विनश्यति ।
आजन्मकृतमध्याह्ने सायाह्ने सप्तजन्मसु ॥
महादेवं महेशानं महेश्वरमुमापतिम् ।
महासेनगुरुं वन्दे महाभयनिवारणम् ॥
सकलभुवनकर्ता साम्बमूर्तिः शिवश्चेत्
सकलमपि पुराणं सागमं चेत्प्रमाणम् ।
यदि भवति महत्त्वं मूर्तिरुद्राक्षमाला
किमिति न मृतिरस्मद्द्रोहिणः स्यादकाण्डे ॥

No. 11099. महादेवस्तोत्रम्.
MAHÂDÊVASTÔTRAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 28*a* of the MS. described under No. 6600, wherein it is given as Mahādēvāṣṭaka in the list of other works

Contains ten stanzas.

Same work as the above

No. 11100. महादेवस्तोत्रम्.
MAHÂDÊVASTÔTRAM.

Pages, 2. Lines, 8 on a page.

Begins on fol. 181*b* of the MS. described under No. 119, wherein this work has been mentioned as Mahādēvaṣōḍaśastava in the list of other works

Contains sixteen stanzas.

Same work as the above.

No. 11101. महादेवस्तोत्रम्.
MAHÂDÊVASTÔTRAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 20*b* of the MS. described under No. 5422, wherein this work has been mentioned as Mahādēvāṣṭaka in the list of other works.

Contains ten stanzas.

Same work as the above.

No. 11102. महादेवाष्टकम्.
MAHÂDÊVÂSṬAKAM.

Pages, 2. Lines, 6 on a page.

Begins on fol. 9*a* of the MS. described under No. 10955

Complete.

Eight stanzas in praise of Mahādēva or Śiva.

Beginning :

कृपासिन्धुपूर गिरीन्द्रप्रचार अपाङ्गदयकार चतुर्वेदसार ।
महादेव शम्भो महादेव शम्भो महादेव शम्भो महादेव शम्भो ॥ १ ॥
गिरामिश्र(क)रूप विशालप्रतापहरार्द्र(र्द्ध)न्द्रचाप जगाण्डप्रदीप ।
महादेव शम्भो (महादेव शम्भो महादेव शम्भो महादेव शम्भो) ॥२॥

End :

गणेशाधिपत्य गणानन्दनृत्य फणीनादिस्तुत्य प्रपञ्चैकनित्य ।
महादेव शम्भो महादेव शम्भो महादेव शम्भो महादेव शम्भो ॥ १०॥

No. 11103. महिम्नस्स्तवः.

MAHIMNASSTAVAH.

Pages, 3. Lines, 31 on a page.

Begins on fol. 54a of the MS. described under No. 1493, wherein this work has been omitted to be included in the list of other works.

Complete.

Same work as the one described under R.No. 309(a) of the Triennial Catalogue of MSS., Vol. I., Part I-B. The authorship of this hymn is attributed to Puṣpadanta by some and to Kumārila Bhaṭṭācārya by certain other commentators. Ahōbala states in his commentary that Puṣpadanta, a Gandharva, composed this hymn to glorify Śiva when He appeared before him in response to his severe penances. In another commentary it is said that Puṣpadanta composed this hymn in expiation of the sin of disregarding the remains of offerings made to Śiva. Dēsayāmātya, another commentator, attributes it to Kumārila Bhaṭṭa whom he considers as an incarnation of Subrahmaṇya, son of Śiva.

End :

अहरहरनवद्यं धूर्जटेः स्तोत्रमेतत्
पठति परमभक्त्या शुद्धचित्तः पुमान् यः ।

स भवति शिवलोके रुद्रकल्पस्तदैव
प्रचुरतरधनायुःपुत्रवान् कीर्तिमांश्च ॥
दीक्षादानं तपस्तीर्थं ध्यानयज्ञादिकाः क्रियाः ।
महिम्नस्स्तवपाठस्य कलां नार्हन्ति षोडशीम् ॥
महेशान्नापरो देवो महिम्नो नापरं(रः) स्तवः ।
अघोरान्नापरो मन्त्रोः नास्ति तत्त्वं गुरोः परम् ॥

Colophon :

महिम्नस्स्तवः सम्पूर्णः ॥

No **11104.** महिम्नस्स्तवः.

MAHIMNASSTAVAḤ.

Pages, 3. Lines, 5 on a page.

Begins on fol. 11a of the MS. described under No. 2972.

Breaks off in the twelfth stanza.

Same work as the above.

No **11105.** महिम्नस्स्तवः.

MAHIMNASSTAVAḤ.

Pages, 14. Lines, 6 on a page.

Begins on fol. 1a of the MS. described under Nó. 2550.

Complete.

Same work as the above, but with the additional stanzas in the end as given below :—

याचेऽहं याचेऽहं पुनरपि तामेव तामेव ॥
श्रीपुष्पदन्तमुखपङ्कजनिर्गतेन स्तोत्रेण किल्बिषहरेण हरिप्रियेण ।
कण्ठस्थितेन पठितेन समाहितेन सुप्रीणितो भवति भूतपतिर्महेशः ॥

*   *   *   *

असमाप्तमिदं स्तोत्रं पुण्यगन्धर्वभाषितम् ।
अनौपम्यं मनोहारि शैवमीश्वरवर्णनम् ॥

*   *   *   *

एककालं द्विकालं वा त्रिकालं यः पठेन्नरः ।
शिवलोकमवाप्नोति शिवेन सह मोदते ॥
श्रीमहिम्नस्स्तवः पूर्णः ॥
शिवेति परमेशेति शङ्करेति हरेति च ।
पार्वतीप्राणनाथेति स्मर जीव निरन्तरम् ॥
मत्समः पातकी नास्ति त्वत्समो नास्ति पापहा ॥
इति मत्वा महादेव यथेच्छसि तथा कुरु ॥

No. 11106. महिम्नस्स्तवः.
MAHIMNASSTAVAḤ.

Pages, 10. Lines, 7 on a page.

Begins on fol. 25*b* of the MS. described under No. 200, and not on fol. 25*a* as stated therein.

Complete.

Same work as the above, but with the following additional stanza at the end :—

याचेऽहं याचेऽहं शिव तव चरणारविन्दयोर्भक्तिम् ।
याचेऽहं याचेऽहं पुनरपि तामेव तामेव ॥

Colophon:

इति श्रीपुष्पदन्ताख्यगन्धर्वविरचितमहिम्नस्स्तवः समाप्तः ॥

No. 11107. महिम्नस्स्तवः.
MAHIMNASSTAVAḤ.

Pages, 8. Lines, 6 on a page.

Begins on fol. 5*a* of the MS. described under No. 11061

Wants six stanzas in the beginning.

Same work as the above.

Colophon:

इति महिम्नस्स्तोत्रं सम्पूर्णम् ॥

No. 11108. महिम्नस्स्तवः—आन्ध्रभाषाटीकासहितः.
MAHIMNASSTAVAḤ WITH TELUGU MEANING.

Pages, 36. Lines, 6 on a page.

Begins on fol. 35a of the MS. described under No. 5500.

Complete.

Same work as the above, but with the meaning of the stanzas in the Telugu language.

The copying of this manuscript is said to have been completed on the 7th day of the bright fortnight in the month of Karttikai of the year Bhava.

No. 11109. महिम्नस्स्तवः.
MAHIMNASSTAVAḤ.

Pages, 15. Lines, 6 on a page.

Begins on fol. 1a of the MS. described under No. 10909.

Complete.

Same work as the above. The authorship is here attributed to Bhaṭṭapādācārya.

Colophon:

इति श्रीमद्भट्टपादाचार्यविरचितं महिम्नस्स्तोत्रं सम्पूर्णम् ॥

No. 11110. महिम्नस्स्तवः.
MAHIMNASSTAVAḤ.

Pages, 17. Lines, 5 on a page.

Begins on fol. 1a of the MS. described under No. 10358.

Complete.

Same work as the above.

No. 11111. महिम्नस्स्तवः.
MAHIMNASSTAVAḤ.

Pages, 18. Lines, 11 on a page.

Begins on fol. 117a of the MS. described under No. 2710.

Complete.

Same work as the above.

No. **11112.** महिम्नस्तवः.
MAHIMNASSTAVAḤ.

Substance, palm-leaf. Size, 17¼ × 1⅜ inches. Pages, 7. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other work herein is Kirātārjunīya *ka*.

Complete.

Same work as the above, but with the additional stanzas at the end as given below :—

श्रीपुष्पदन्तमुखपङ्कजनिर्गतेन स्तोत्रेण किल्बिषहरेण हरप्रियेण ।
कण्ठस्थितेन पठितेन समाहितेन सुप्रीणितो भवति भूतपतिर्महेशः ॥

* * * *

जातस्य जायमानस्य गर्भस्थस्यापि देहिनः ।
मा भून्मम कुले जन्म शम्भुर्यस्य न दैवतम् ॥

Colophon :

इति श्रीपुष्पदन्ताचार्यविरचितं महिम्नस्तोत्रं सम्पूर्णम् ॥

No. **11113.** महिम्नस्तवः.
MAHIMNASSTAVAḤ.

Pages, 1. Lines, 5 on a page.

Begins on fol. 52*a* of the MS. described under No. 5858.

Contains only four stanzas.

Same work as the above.

No. **11114.** महिम्नस्तवः.
MAHIMNASSTAVAH.

Pages, 11. Lines, 6 on a page.

Begins on fol. 95 of the MS. described under No. 2418.

Complete.

Same work as the above, but with colophon.

No. 11115. महिम्नस्स्तवः.
MAHIMNASSTAVAḤ

Pages, 9. Lines, 6 on a page.

Begins on fol. 1a of the MS. described under No. 5928.

Almost complete; breaks off in the last stanza.

Same work as the above.

No. 11116. महिम्नस्स्तवः.
MAHIMNASSTAVAḤ.

Pages, 6. Lines, 9 on a page.

Begins on fol. 153b of the MS. described under No. 119.

Complete.

Same work as the above.

No. 11117. महिम्नस्स्तवः.
MAHIMNASSTAVAḤ.

Pages, 10. Lines, 7 on a page.

Begins on fol. 32a of the MS. described under No. 2155.

Complete.

Same work as the above, but with one additional stanza only at the end as given below:—

कुबेरमित्र देवेश भूतेश त्रिपुरान्तक ।
पार्वतीहृदयानन्द प्रथमार्घ्यं गृहाण मे ॥

This manuscript is said to have belonged to one Rāmadāsan Rāmacandran.

No. 11118. महिम्नस्स्तवः.
MAHIMNASSTAVAḤ

Pages, 7. Lines, 9 on a page.

Begins on fol. 4a of the MS. described under No. 120 and not on fol. 3a as stated therein.

Complete.

Same work as the above.

At the end of the work, the following Telugu stanza is found in which it is stated that Viśvanāthakavi wrote a commentary on this work at the instance of Bappati Canna Mallanāyakudu.

[illegible]

[illegible]

[illegible]

[illegible]

No. 11119. महिम्नस्स्तवः—सव्याख्यः.

MAHIMNASSTAVAḤ WITH COMMENTARY.

Substance, palm-leaf. Size, 11 × 1¼ inches. Pages, 57. Lines, 7 on a page. Character, Grantha. Condition, good. Appearance, new.

Same text as the above together with the commentary entitled Kalpalata which was written by Ahōbala, son of Nṛsiṁhabhaṭṭa of the Bhāskara family and Rāmāmbā.

Beginning:

ईशानं सर्वविद्यानामीश्वरं पार्वतीपतिम् ।
भजामि श्रीमहादेवं सर्वदेवोत्तमं प्रभुम् ॥

व्यालमालमनलाम(ल)फालं शूलपालममलामलशीलम् ।
कालकालमकलङ्क(ङ्कि)लमौलिरीति व्याकमनुवेलमलीकम् ॥

महेश्वराराधनदत्तशीको श्रीमन्महिम्नार्थविचारशीलः ।
अहोबलः पूजितकालकालः महिम्नटीकां तनुते सुशीलः ॥

पुष्पदन्तनामगन्धर्वविशेषः शिवैकशरणो भूत्वा शिवप्रसादार्थं हिमवत्पर्वते तपः कृत्वा स्वतपस्सन्तुष्टे शङ्करे प्रसन्ने स्वशक्त्या शिवचरणाम्बुरुहं श्रीफलदलादिभिः समभ्यर्च्य शङ्करं स्तोतुमिच्छन् शङ्करगुणानामनन्तत्वेनाप्रमेयत्वा(त्) गुणकथनरूपस्तुतिकरणमशक्यमित्याशङ्क्य स्वानौद्धत्यं प्रकटयन् स्तोतुमारभते ।

महिम्नः पारं ते (. . . . .) नदवसन्नास्त्वयि गिरः ॥

हे हर आध्यात्मिकाधिभौतिकाधिदैविकादिसकलदुःखनिवर्तकत्वेनैव श्रुतिस्मृतीतिहासपुराणादिषु प्रसिद्धोऽसि तथाच मद्दुःखहरणे पार्थक्येन व्यापारं (न) करिष्यसीति भावः। हे हर ते महिम्नः पारमवधिमविदुषः एतावानेव श्रीमहादेवमहिमेतीयत्तामजानतः; कर्तरि षष्ठी।

End:

अथेदं स्तोत्रं पठितं सद्भीष्टदायकमिति कश्यपो वदति देवानृषीन्प्रत्यपि अघोरेत्यादिना। अथेदानीं शिवस्तुतिगुम्भितमिदं स्तोत्रं पठितम्। स तु पौण्डरीकादिमहायोगरक्तुलादिसकलमहादानजपकाश्यप्रयागादिसकलतीर्थपथाग्निसेवादिसमस्ततपोदीक्षादि चाधिकरोतीत्याह— दीक्षेत्यादिना।

सद्गसरेखाङ्कविशालफालः शिवार्चनास्वादितचारुमौलिः।
अहोबलः कीर्तितकालकालो महिम्नटीकां विदधे विपश्चिताम्(ः)॥

Colophon:

